## Full Gajendra Moksha Stotra Lyrics in Sanskrit

**श्री शुक उवाच** -
एवं व्यवसितो बुद्ध्या समाधाय मनो हृदि ।
जजाप परमं जाप्यं प्राग्जन्मन्यनुशिक्षितम ॥१॥

**गजेन्द्र उवाच** -
ऊं नमो भगवते तस्मै यत एतच्चिदात्मकम ।
पुरुषायादिबीजाय परेशायाभिधीमहि ॥२॥

**यस्मिन्निदं यतश्चेदं येनेदं य इदं स्वयं ।**
**योस्मात्परस्माच्च परस्तं प्रपद्ये स्वयम्भुवम** ॥३॥

यः स्वात्मनीदं निजमाययार्पितं
क्वचिद्विभातं क्व च तत्तिरोहितम ।
अविद्धदृक साक्ष्युभयं तदीक्षते
स आत्म मूलोऽवत् मां परात्परः ॥४॥

**कालेन पंचत्वमितेषु कृत्स्नशो**
**लोकेषु पालेषु च सर्व हेतुषु ।**
**तमस्तदाऽऽऽसीद गहनं गभीरं**
**यस्तस्य पारेऽभिविराजते विभुः** ॥५॥

न यस्य देवा ऋषयः पदं विदु-
र्जन्तुः पुनः कोऽर्हति गन्तुमीरितुम ।
यथा नटस्याकृतिभिर्विचेष्टतो
दुरत्ययानुक्रमणः स मावतु ॥६॥

**दिदृक्षवो यस्य पदं सुमंगलम**
**विमुक्त संगा मुनयः सुसाधवः ।**
**चरन्त्यलोकव्रतमव्रणं वने**
**भूतात्मभूता सुहृदः स मे गतिः** ॥७॥

न विद्यते यस्य न जन्म कर्म वा
न नाम रूपे गुणदोष एव वा ।
तथापि लोकाप्ययसम्भवाय यः
स्वमायया तान्यनुकालमृच्छति ॥८॥

**तस्मै नमः परेशाय ब्रह्मणेऽनन्तशक्तये ।**
**अरूपायोरुरूपाय नम आश्चर्य कर्मणे** ॥९॥

नम आत्म प्रदीपाय साक्षिणे परमात्मने ।
नमो गिरां विदूराय मनसश्चेतसामपि ॥१०॥

**सत्त्वेन प्रतिलभ्याय नैष्कर्म्येण विपश्चिता ।**
**नमः कैवल्यनाथाय निर्वाणसुखसंविदे ॥११॥**

नमः शान्ताय घोराय मूढाय गुण धर्मिणे ।
निर्विशेषाय साम्याय नमो ज्ञानघनाय च ॥१२॥

**क्षेत्रज्ञाय नमस्तुभ्यं सर्वाध्यक्षाय साक्षिणे ।**
**पुरुषायात्ममूलाय मूलप्रकृतये नमः ॥१३॥**

सर्वेन्द्रियगुणद्रष्ट्रे सर्वप्रत्ययहेतवे ।
असताच्छाययोक्ताय सदाभासाय ते नमः ॥१४॥

**नमो नमस्तेऽखिल कारणाय**
**निष्कारणायाद्भुत कारणाय ।**
**सर्वागमान्मायमहार्णवाय**
**नमोपवर्गाय परायणाय ॥१५॥**

गुणारणिच्छन्न चिदूष्मपाय
तत्क्षोभविस्फूर्जित मानसाय ।
नैष्कर्म्यभावेन विवर्जितागम-
स्वयंप्रकाशाय नमस्करोमि ॥१६॥

**मादृक्प्रपन्नपशुपाशविमोक्षणाय**
**मुक्ताय भूरिकरुणाय नमोऽलयाय ।**
**स्वांशेन सर्वतनुभृन्मनसि प्रतीत-**
**प्रत्यग्दृशे भगवते बृहते नमस्ते ॥१७॥**

आत्मात्मजाप्तगृहवित्तजनेषु सक्तै-
र्दुष्प्रापणाय गुणसंगविवर्जिताय ।
मुक्तात्मभिः स्वहृदये परिभाविताय
ज्ञानात्मने भगवते नम ईश्वराय ॥१८॥

**यं धर्मकामार्थविमुक्तिकामा**
**भजन्त इष्टां गतिमाप्नुवन्ति ।**
**किं त्वाशिषो रात्यपि देहमव्ययं**
**करोतु मेऽदभ्रदयो विमोक्षणम् ॥१९॥**

एकान्तिनो यस्य न कंचनार्थ
वांछन्ति ये वै भगवत्प्रपन्नाः ।
अत्यद्भुतं तच्चरितं सुमंगलं
गायन्त आनन्द समुद्रमग्नाः ॥२०॥

**तमक्षरं ब्रह्म परं परेश-**
**मव्यक्तमाध्यात्मिकयोगगम्यम ।**
**अतीन्द्रियं सूक्ष्ममिवातिदूर-**

**मनन्तमाद्यं परिपूर्णमीडे ॥२१॥**

यस्य ब्रह्मादयो देवा वेदा लोकाश्चराचराः ।
नामरूपविभेदेन फल्व्या च कलया कृताः ॥२२॥

**यथार्चिषोऽग्नेः सवितुर्गभस्तयो**
**निर्यान्ति संयान्त्यसकृत् स्वरोचिषः ।**
**तथा यतोऽयं गुणसंप्रवाहो**
**बुद्धिर्मनः खानि शरीरसर्गाः ॥२३॥**

स वै न देवासुरमर्त्यतिर्यंग
न स्त्री न षण्डो न पुमान न जन्तुः ।
नायं गुणः कर्म न सन्न चासन
निषेधशेषो जयतादशेषः ॥२४॥

**जिजीविषे नाहमिहामुया कि-**
**मन्तर्बहिश्चावृतयेभयोन्या ।**
**इच्छामि कालेन न यस्य विप्लव-**
**स्तस्यात्मलोकावरणस्य मोक्षम ॥२५॥**

सोऽहं विश्वसृजं विश्वमविश्वं विश्ववेदसम ।
विश्वात्मानमजं ब्रह्म प्रणतोऽस्मि परं पदम् ॥२६॥

**योगरन्धित कर्माणो हृदि योगविभाविते ।**
**योगिनो यं प्रपश्यन्ति योगेशं तं नतोऽस्म्यहम् ॥२७॥**

नमो नमस्तुभ्यमसह्यवेग-
शक्तित्रयायाखिलधीगुणाय ।
प्रपन्नपालाय दुरन्तशक्तये
कदिन्द्रियाणामनवाप्यवर्त्मने ॥२८॥

**नायं वेद स्वमात्मानं यच्छक्त्याहंधिया हतम् ।**
**तं दुरत्ययमाहात्म्यं भगवन्तमितोऽस्म्यहम् ॥२९॥**

**श्री शुकदेव उवाच** -
एवं गजेन्द्रमुपवर्णितनिर्विशेषं
ब्रह्मादयो विविधलिंगभिदाभिमानाः ।
नैते यदोपससृपुर्निखिलात्मकत्वात
तत्राखिलामरमयो हरिराविरासीत् ॥३०॥

**तं तद्वदार्त्तमुपलभ्य जगन्निवासः**
**स्तोत्रं निशम्य दिविजैः सह संस्तुवद्भि : ।**
**छन्दोमयेन गरुडेन समुह्यमान –**
**श्चक्रायुधोऽभ्यगमदाशु यतो गजेन्द्रः ॥३१॥**

सोऽन्तस्सरस्युरुबलेन गृहीत आर्त्तो
दृष्ट्वा गरुत्मति हरिम् ख उपात्तचक्रम ।
उत्क्षिप्य साम्बुजकरं गिरमाह कृच्छा –
नारायणाखिलगुरो भगवन्नमस्ते ॥३२॥

**तं वीक्ष्य पीडितमजः सहसावतीर्य**
**सग्राहमाशु सरसः कृपयोज्जहार ।**
**ग्राहाद् विपाटितमुखादरिणा गजेन्द्रं**
**सम्पश्यतां हरिरमूमुच दुस्त्रियाणाम्** ॥३३॥

*- श्री गजेन्द्र कृत भगवान का स्तवन*